National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 385-387
© 2026 NJHSR
www.sanskritarticle.com

**डॉ. विक्रान्त साहु**
अतिथि अध्यापकः, संस्कृतविभागः,
सर्वकारीय महिला महाविद्यालयः,
सुन्दरगढम्, ओड

**Correspondence:**
**डॉ. विक्रान्त साहु**
अतिथि अध्यापकः, संस्कृतविभागः,
सर्वकारीय महिला महाविद्यालयः,
सुन्दरगढम्, ओडिशा

# गीतगोविन्दस्य सामाजिकजीवने प्रभावः

**डॉ. विक्रान्त साहु**

गीतगोविन्दकारः कविराजजयदेवः संस्कृतसाहित्यजगति असाधारणप्रतिभाधररूपेण संपुज्यते। सः संगीतमयं महाकाव्यं गीतगोविन्दं विरच्य संस्कृतसाहित्ये एकमभिनवं मार्गमुद्धाटयामास। अस्य महाकाव्यस्य हेदृशी लोकप्रियता आसीत् येन भारतवर्षस्य विविधप्रान्तीयाः बहवः कवयः तदनुसरणेन बहुनि काव्यानि विरचितवन्तः ।

जयदेवस्य जन्मस्थानविषये बहवः विचाराः सन्ति । परन्तु बहुभिः प्रमाणैः जयदेवस्य उत्कलीयत्वं सुसिद्धमस्ति। महाकविः जयदेवः स्वग्रन्थे स्वविषये स्वस्य जन्मस्थानविषये च न कुत्रापि किमपि विशेषभावेन सुचयति। केवलं गीतगोविन्दमहाकाव्.यस्य सप्तमप्रबन्धस्य अष्टमे पद्ये आत्मानं “केन्दुबिल्वसमुद्रसम्भवः रोहिणीरमणः” इति प्रतिपादयति[१]। अस्य पदस्थार्थं सर्वगसुन्दरीटीकारः एवं प्रतिपादयति यत् किन्दुबिल्वशासनस्य प्रसिद्धया समुद्रेण सह अस्य तुलना क्रियते । महोदधि-समुत्पत्रः चन्द्रः तथा स्वस्य आकर्षणशक्त्या ज्योत्स्नाधवलितसमुद्रवक्षसि उन्तुंगतरंगान् संसृज्य तस्य श्रियं वर्द्धयति तथा केन्दुबिल्वशासनरुपक-सागरसम्भुतः कविराजः श्रीजयदेवः स्वकवित्वपाण्डित्यख्यातिभिः स्वजन्मभूमेः गौरवं वर्द्धयामास[२]। गीतगोविन्द-रसिकप्रियाटीका केन्दुबिल्वं ग्रामार्थे गृह्णाति[३]। सारदीपिकासंजीवनीबालबोधिनीटीकाकाराः अपि केन्दुबिल्वं जयदेवस्य जन्म ग्राम इति स्वीकुर्वन्ति[४]। उत्कलप्रदेशस्य पुरीमण्डले प्राचीनदीतीरे केन्दुवृक्षबिल्ववृक्षपरिपूर्णं केन्दुबिल्वशासनं (केन्दुलिशासनम्) विराजते । अस्मिन् शासने कविराजः जयदेवः समजायतेति बहवः ग्रन्थकाराः प्रमाणयन्ति[५]।

कविराजजयदेवस्य श्रीजगन्नाथभक्तिः सुविख्याता । चन्द्रदत्तमते जयदेवः पुरुषोत्तमे (पुरीनगर्य्याम्) गीतगोविन्दं निर्माय श्रीजगनाथाय निवेध च कृतकृत्.यः अभूत्[६] ।
महाराष्ट्रीय प्राचीनकविः महीपतिः (१७६५ ख्रीष्टाब्द) उत्कलीय-भक्तकविरामदासश्च (आ. १७७० ख्री.) स्वरचितेषु ग्रन्थेषु जयदेवस्य श्रीक्षेत्रावस्थिति सुचयन्ति[७] ।
केचिज्जयदेवस्य वंगीयत्वं कथयन्ति । तदेव कल्पितमसारं च । कस्यामपि गीतगोविन्दटीकायां जयदेवस्य वंगीयत्वं न उल्लिखितमस्ति। परन्तु बहवः भारतीयाः वैदेशिकाश्च गवेषकाः कवेः उत्कलीयत्वं स्वीकुर्वन्ति[८] ।

संगीतमयं महाकाव्यं गीतगोविन्दं द्वादशभिः सर्गैः विभक्तम् । अत्र चतुर्विंशतिः गीतानि, सप्तसप्ततिः श्लोकाश्च सन्ति । इमे श्लोकाः अनुष्टुप्-आर्य्या-उपेन्द्रवज्रा-दुतविलम्बित-पथ्यावक्त्र-पुष्पिताग्रा-पृथ्वी-मालिनी-वंशस्थ-वसन्ततिलका-शार्दूलविक्रीडित-शिखरिणी-स्त्रग्धरा-हरिणी-छन्दोभिःनिबद्धाःभवन्ति। गीतगोविन्दस्य गीतानि कर्णाट-गुज्जरी-गुण्डकिरी-देशी-देशीवराडि-भैरवी-मालव-रामकेरी-वरांडि-वसन्ताख्यैः एकादशभिः रागैः रचितानि सन्ति । राधामाधवयोः रतिकेलिकथासमेतस्य अस्य महाकाव्यस्य सहृदयहृदयहारिता विश्वविदिताऽस्ति ।

**गीतगोविन्दस्य लोकप्रियता -**

महाकवेः जयदेवस्य महाकाव्यं गीतगोविन्दं संस्कृतसाहित्यस्य अनुपनं रत्नम् । अस्य महाकाव्यस्य असाधारणपदलालित्येन अनिर्वचनीयभक्तिविभवेन अवर्णनीयरसपरिपाकेण लोकोत्तरचमत्कारितया च साधरणजनानां सहृदयानां च हृदयानि हृतान्येव ।

अस्याः रचनायाः परम् अष्टशतवर्षेषु व्यतीतेषु अपि नेदृशं किमापि काव्यं संस्कृतसाहित्ये अधुनाऽपि दृष्टिगोचरं जायते। गीतगोविन्दं संस्कृत-साहित्यजगति संगीतममयहाकाव्यरचनापरम्परायाः सर्वप्रथ-मना अनन्या सृष्टिः ।

कविराजः जयदेवः संगीतमयं महाकाव्यं गीतगोविन्दं निर्माय संस्कृतसाहित्ये अभिनवं मार्गं प्रदिर्शतवान्। यद्यापि इयं कृतिः आकृत्या न गरीयसी तथाऽपि पदलालित्ये भक्तिभावप्रकाशे रसोच्छवासे च संस्कृतसाहित्ये महीयसी सती अद्वितीया वर्त्तते । इदं महाकाव्यं मधुरकोमलकान्तपदावल्या मनोहरवर्णनशैल्या असाधा-रणप्रकाशभंग्या रसालतया च पृथिव्याः समग्रं सभ्यरसिकसमाजं चमत्करोति । न केवलं भारते अपि तु भारतात् बहिः पृथिव्याः विभिन्नेषु भागेषु अपि अस्य महाकाव्यस्य अनुवादालोचनादयः बहुसंख्यया परिदृश्यन्ते । एतदेव च अस्य महाकाव्यस्य लोकप्रियतां प्रमाणयति ।

भारतवर्षस्य विभिन्नप्रान्तेषु बहवः व्याख्याकाराः गीतगोविन्दस्य विविधनामांकिताः टीकाः रचितवन्तः। विभिन्नासु आधुनिक-भारतीयभाषासु अपि गीतगोविन्दस्य अनुवादाः जाताः। अस्य महाकाव्यस्य प्रभावेण सर्वे साहित्यिकाः प्रबुद्धाः प्रभाविताश्च संजाताः, यैः अनेकाः अनुकृतयोऽपि विरचिताः ।

**जनजीवने गीतगोविन्दम् -**

गीतगोविन्दस्य प्रभावः न केवलं टीका-अनुवाद-अनुकृति-आलोचनासु सीमितः, परं तु शिल्पिनः अपि एतेन प्रभाविताः जाताः। तस्मात् भारतस्य विविधभागेषु गीतगोविन्दवर्णितरहस्यलीलानां वनोपवन-काननकुंजदुमाणां दशावताराणां च चित्राणि काष्ठ-पट्ट-तालपत्रादिषु बहुशः चित्रितानि परिलक्षन्ते। उत्कलराज्ये वयनशिल्पे अपि गीतगोविन्दस्य सुप्रभावः परिदृश्यते। महाप्रभोः श्रीजगन्नाथस्य प्रीत्यर्थं प्रत्यहं बडसिंहारसेवा-समये केन्दुबिल्यग्रामवास्तव्यैः वयनशिल्पिभिः निर्मितं गीतगोविन्दश्लोकावली-मण्डितम् उत्तरीयं तदुपरि प्रदीयते । इदं वस्त्रं "गीतगोविन्दखण्डुआ"/उत्त्ररीयम् इति उच्चते । इयं परम्परा अधुनाऽपि श्रीजगन्नाथमन्दिरे प्रचलन्ती अस्ति[९]। अस्मिन् वस्त्रवयनप्रसंगे एका मनोरमा किंवदन्ती अपि श्रूयते[१०]। गीतगोविन्दस्य रतिवर्णनं मनसि निधाय उत्कलीयभास्करैः मन्दिरगात्रेषु परोक्षतया लौकिकरतिलीलाचित्राणि निर्मितानि ।

इदं महाकाव्यं साहित्यिकानाम् अनुवादकानाम् आलोचकानां शिल्पिनां नर्त्तकानां च यथा स्नेहास्पदं जातं तदधिकं प्रीतिपात्रं जातं भक्ताग्रगण्यानाम्। उत्कलीयानां श्रीजगन्नाथभक्तानां चैतन्यानुगामिनां वैष्णवानां च गीतगोविन्दं परमप्रेमधनम् । विशेषतः उत्कलेषु न केवलं वैष्णवाः अपि तु शैवाः शिवालयेषु शक्ताः चण्डीमन्दिरेष्वपि गीतगोविन्दं गायन्ति[११] । श्रीमन्दिरे महाप्रभोः जगन्नाथस्य पुरतः नित्यसेवारुपेण प्रत्यहं गीतगोविन्दगानं भवति । अतः महाकाव्यमिदं न केवलं भक्तानां भगवतोऽपि च प्रेमास्पदमिति भक्तिमतां विश्वासः ।

**सन्दर्भ ग्रन्थः -**

१.वर्णितं जयदेवकेन हरेरिदं प्रवणेन ।
केन्दुविल्वसमुद्रसम्भवरोहिणीरमणेन ।। (गीतगो., सप्तमप्रबन्धे)

२.डक्टरप्रमोचन्द्रमिश्रकृतसर्वांगसुन्दरीटीकासमेत श्रीजयदेवविरचित गीतगोविन्दसमीक्षा, द्वितीयभागः, पृ. ५७.

३.केन्दुबिल्वो जयदेवकुलवृत्तिग्रामः स एव महत्वात् समुद्र इव ।
तत्र सम्भवो यस्य तादृशेन रोहिणीरमणेन पूर्णचन्द्रेण ।।
गीतगोविन्दम् (रसिकप्रियाटीकासहितम् - पृ. ५८.)

४.(क)उदुबिल्व नाम शासनं कुलं वा जातिमहत्वात् समुद्रमिव तत् सम्भवो रोहिणीरमणश्चन्द्र इव यः –
सारदीपिका - ओ.एस्.एम्., एस्.एम्.एस्. - ९१, पृ ४३ ।

(ख) केन्दुबिल्वं नाम जयदेवगोत्रं कुलं ग्रामो बा ।
गीतगोविन्दमहाकाव्यं/संजीवनीटीकासहितम् - पृ.१३९।

(ग) केन्दुबिल्वनामा जयदेवस्य ग्रामः -
जयदेव ओ गीतगोविन्द/बालबोधिनीटीकासहित - पृ.१८।

५. (क)जगन्नाथपुरी प्रान्ते देशे चैवोत्कलाभिधे ।
केन्दुबिल्व इति श्यातो ग्रामो ब्रह्मणसंकुलः ।।
तत्रोत्कले द्विजो जातो जयदेव इति श्रुतः ।
वेदाभ्यासरतः शान्तः पुरुषोत्तमपूजकः ।।
चन्द्रदत्तकृतभक्तमाला - पृ.६१

(ख) विप्र से जयदेव नाम ।क्षेत्रवर कु आगमन ।।
केन्दुलि शासन ता ग्राम ।प्राची नदीर तटे पुण ।।
माधवपट्टनायककृत-वैष्णवलीलामृत-द्वितीयाध्यायः ।

६. निर्माय गीतगोविन्दं पुस्तकं पुरुषोत्तमे ।
निवेद्य कृतकृत्योऽभूत् जयदेवो महामनाः ।।
चन्द्रदत्तकृत-भक्तमाला - पृ.६१ ।

७.(क) जगन्नाथक्षेत्र समीप जाप ।तिन्दुविल्वग्राम नासाभिधान ।।
ब्रह्मणवंशी अक्तारपुर्ण । तेथे घेतला श्रीव्यासें ।। (२-३)
हमणानि जयदेव कविने कन । श्रीगीतगोविन्द ग्रन्थ केला ।।
(२-१२)
महीपतिः - भक्तविजय्-द्वितीयोऽध्यायः ।

(ख) जयदेव महाशय महान मानुष ।
श्रीपुरुषोत्तमक्षेत्रे वृक्षमूले वास ।।
आगाधपण्डित्यहय अतुलभक्तिमान्।
श्रीजगन्नाथप्रभुर कृपार भाजन ।। भक्तमाल, पृ.१३२ ।
झोपडा वन्धिया एक सेवा प्रकाशिला ।
श्रीसधामाधव नाम, ठाकुरेर हैला ।।
तार रिचर्य्यार पञ्चारे नियोजिला ।
राधामाधवेर दासी करिया संपिला ।। भक्तमाल, पृ.१३३ ।

(ग) जनम केन्दुविल्वग्रामे। ब्रह्मण जयदेव नामे ।।

महापण्डित विष्णुभक्त । जित इन्द्रिय सुविनीत ।।
विरक्त निःसंग उदासी । श्रीक्षेत्रे परवेश आसि ।।
एक वृक्षर तले थाइ । श्रीजगनाथंकु सेवइ ।।
रचिला अपूर्व प्रबन्ध ।या नाम श्रीगीतगोविन्द ।।
शुणन्ति आजि याए नित्य । त्रिकाले याहा जगन्नाथ ।।
दार्ढ्यताभक्तिरसामृत - ५० तम अध्यायः ।


८.(क)नीलमणिमिश्रः - आलोचना, पृ. २४ ।

(ख) डाँ. पर्शुराम चतुर्वेदी - उत्तरी भारत की सन्त परम्परा, पृ. ९३ ।

(ग)वरदाचारी - एच्.एस्.एल्., पृ.९५ ।

(घ)डिक्सनारी अफ् ओरियण्टाल लिटरेचर, भा. २, पृ. ६९ ।

(ङ)डक्टरप्रमोदचन्द्रमिश्र सर्वांगसुन्दरीटीकासमेत-श्रीजयदेवविरचित-गीतगोविन्दसमीक्षा - प्रथमभाग, पृ ४८ ।

९. सं. मोहन चरण दास, जयदेव और गीतगोविन्द, पृ.६९-६० ।

१०.सं. ड.के.सि.मिश्र, ओडिशार कवि ज.यदेव, पृ.८७ ।

११.केदारनाथ महापात्र, श्री जयदेव ओ गीतगोविन्द, पृ.९ ।